# Shri Sharada Devi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

## Document Information

Text title : Shri Sharada Devi Stotram

File name : shAradAdevIstotram3.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Brahmachari Badala

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

Shri Sharada Devi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

ૐ હ્રીં વિશુદ્ધાં પ્રકૃતિસ્વરૂપાં
    આધારભૂતાં જગદાદિશક્તિમ્ ।
દયાસ્વરૂપાં જગદાત્મિકાં વૈ
    શ્રી શારદાં ત્વાં પ્રણમામિ નિત્યમ્ ॥ ૧॥

સાઙ્ખ્યૈશ્ચ વેદૈરપિ સર્વશાસ્ત્રૈઃ
    જ્ઞેયા ન માતા પરમાસિ માયા ।
તવ પ્રસાદાદ્વિદિતા ભવેસ્ત્વં
    પ્રસીદ દેવેશિ ગતિસ્ત્વમેકા ॥ ૨॥

રક્તામ્બરા ત્વં જગદમ્બિકા વૈ
    ત્વં વેદમૂર્તિર્ભુવિ વિશ્વધાત્રી ।
સૃષ્ટેઃ સ્થિતેશ્ચ પ્રલયસ્ય કર્ત્રી
    પદામ્બુજં મે તવ દેહિ માતઃ ॥ ૩॥

દાત્રીં જનેભ્યો ભવબન્ધમુક્તે-
    રનન્તવીર્યાં શશિસૂર્યનેત્રામ્ ।
આબ્રહ્મલોકાઃ પ્રણમન્તિ યાં તાં
    નમામ્યહં શારદશારદામ્બામ્ ॥ ૪॥

દેવીં હિ શમ્ભોઃ પરમસ્ય વિષ્ણોઃ
    પ્રિયાં ચ સીતાં રઘુનન્દનસ્ય ।
શ્રી શારદાં વા અવતારમુખ્ય
    શ્રી રામકૃષ્ણસ્ય નમામિ ભૂયઃ ॥ ૫॥

ધ્યૈક્ષન્ત સિદ્ધા સ્તવ શક્તિમન્ત્રં
    તેજોમયં યં હિ તપોભિરુગ્રૈઃ ।
તમેવ નૃણાં ભવ મોક્ષસેતું
    જાને તુ નાહં શરણાગતસ્તે ॥ ૬॥

નક્તન્દિવં યદ્ યતયોઽપિ દેવાઃ
    સિદ્ધાદિસઙ્ઘાસ્તવ પાદપદ્મમ્ ।
ધ્યાયન્તિ ગાયન્તિ નમન્તિ નિત્યં
    દિવ્યં પદં તદ્વિનયેન યાચે ॥ ૭॥

મોહાન્ધકારેઽતિ મમત્વગર્તે
    ભ્રષ્ટોઽસ્મિ માતઃ પરિપાહિ માં ત્વમ્ ।
શ્રી રામકૃષ્ણ-પ્રકૃતિ-સ્વરૂપે
    શ્રી શારદે ત્વાં શરણં પ્રપદ્યે ॥ ૮॥

દેવિ પ્રસીદ પ્રણતાર્તિહન્ત્રી
    પ્રસીદ માતઃ પરમેશ્વરિ ત્વમ્ ।
પ્રસીદ દેવેશિ સદા પ્રસીદ
    પ્રસીદ વિશ્વેશ્વરિ પાહિ નસ્ત્વમ્ ॥ ૯॥

ૐ દુસ્તારાર્ણવ સંસારે નૃણામેકો ગતિર્હિ યા ।
તસ્યૈ તુ શારદાદેવ્યૈ શિવાયૈ ચ નમો નમઃ ॥ ૧૦॥

ઇતિ બ્રહ્મચારિબાદલેનવિરચિતં “શ્રીશ્રીશારદાદેવીસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*